# ३ ग्रामीणक्षेत्रस्य प्रशासनम्



**चित्रम् 1** – पञ्चषष्ठ्यधिकसप्तदशशततमवर्षे (1765) राबर्टक्लाइवः मुगलसम्राजः बिहारराज्यस्य उडीसाराज्यस्य च आस्थानत्वं (दीवानी इत्येताम्) स्वीकुर्वन् अस्ति।

## "ईस्ट-इण्डिया-कम्पनी" इति संस्था प्रधानामात्यत्वेन (दीवान) जाता

अगस्ट्-मासस्य द्वादशदिनाङ्के पञ्चषष्ठ्यधिकसप्तदशशततमे च वर्षे (1765) मुगलसम्राजा (मुगल-बादशाह) "ईस्ट-इण्डिया-कम्पनी" इति संस्था बङ्गप्रान्तस्य आमात्यरूपेण (दीवान) नियोजिता । ऊह्यते यत् एषा घटना केषाञ्चित् आङ्ग्लीयानां भारतीयानां च उपस्थितौ राबर्टक्लाइवस्य आवासे जाता स्यात् इति । परन्तु उपरि प्रदत्तचित्रे एषा घटना भव्ये समारोहे अभवत् इति दर्शितम् अस्ति । इदं चित्रं तेन चित्रकारेण विरचितं यस्मै राबर्टक्लाइवः स्वजीवनस्य स्मरणीयघटनानां चित्रमाध्यमेन रचनस्य दायित्वं समर्पितवान् आसीत्। बङ्गप्रान्तस्य प्रधानामात्यत्वम् (दीवानी इति) आङ्ग्लीयानाम् अधिकारे गतम् इति घटना निश्चयेन काचित् महती घटना आसीत्।

सचिवरूपेण कम्पनी इति संस्था स्वनियन्त्रितस्य भूभागस्य आर्थिकप्रकरणानां मुख्यप्रशासिका जाता । अधुना तया स्वभूमिं शासयितुम् आयं च व्यवस्थितं कर्तुं मार्गः अन्वेष्टव्यः आसीत् । एतदर्थं संस्थया कश्चित् तादृशः मार्गः अन्वेष्टव्यः आसीत् येन ईस्ट-इण्डिया-कम्पनी इति संस्थायाः पर्याप्तः आयः भवेत्। वाणिज्यिकसंस्थारूपेण तया इदम् अपि ध्यातव्यम् आसीत् यत् सा स्वावश्यकतानुरूपं वस्तूनां क्रयणं विक्रयणं च अपि कर्तुं शक्नुयात्।

कालक्रमेण संस्था एतत् अपि अवगतवती यत् तया सावधानम् अग्रे गन्तव्यं भविष्यति। बाह्यशक्तेः कारणात् ईस्ट-इण्डिया-कम्पनी इति संस्थया तादृशैः जनैः सह अपि मैत्रीभावेन व्यवहर्तव्यम् आसीत् ,ये जनाः आदौ ग्रामादिषु शासकरूपेण आसन् तथा च अधुना अपि ते पर्याप्तशक्ति-सम्पन्नाः सम्मानीयाः च आसन्। एतादृशाः शक्तिसम्पन्नाः जनाः स्थानीयसत्तायाम् आसन् तेषाम् उपरि नियन्त्रणं तु आवश्यकम् आसीत् परन्तु तेषां सर्वथा लोपः न कर्तुं शक्यते स्म।

एतत् कार्यं कथं भवेत् ? एतस्मिन् अध्याये वयं द्रक्ष्यामः यत् "ईस्ट-इण्डिया-कम्पनी" इति संस्थया कथं ग्रामीणक्षेत्राणि उपनिवेशत्वेन कृतानि ? आयस्य संसाधनानि कथम् अर्जितानि ? जनानाम् अधिकाराणां निर्धारणं कथं कृतम्, स्वेच्छया च सस्योत्पादनं कथं कारितम् ?

## संस्थायाः आयः

कम्पनी इति संस्था प्रधानामात्यपदे आरूढा तु जाता , परन्तु अधुना अपि सा आत्मानं वणिक्-रूपेण एव मन्यते स्म। कम्पनी इति संस्था आधिक्येन राजस्वं तु वाञ्छति स्म परन्तु राजस्वाकलनस्य सङ्ग्रहणस्य च काम् अपि नियमितव्यवस्थां कल्पयितुं सङ्कोचम् अनुभवति स्म। कम्पनी इति संस्थायाः केवलः एषः एव प्रयासः आसीत् यत् न्यूनातिन्यूनमूल्येन समीचीनतमकार्पासं कौशेयवस्त्रं च क्रीणीयात् इति। एतस्मात् कारणात् पञ्चवर्षाभ्यन्तरे बङ्गप्रान्ते संस्थाद्वारा क्रीयमाणवस्तूनां मूल्यं द्विगुणितम् अभवत्। पञ्चषष्ट्यधिकाष्टादशशततमवर्षात् (1865) प्राक् कम्पनी इति संस्था ब्रिटेनतः सुवर्णरजतयोः आयातं करोति स्म तथा च एतेषां वस्तूनां प्रतिदाने अन्यानि वस्तूनि क्रीणाति स्म। अधुना बङ्गप्रान्ते संगृह्यमाणेन धनेन एव निर्याताय वस्तूनि क्रेतुं शक्यन्ते स्म।

शीघ्रम् एव एतत् स्पष्टम् अभवत् यत् बङ्गप्रान्तस्य अर्थव्यवस्था केनचित् गहनसङ्कटेन ग्रस्यते। शिल्पकाराः ग्रामं परित्यज्य पलायन्ते स्म यतो हि तैः बलात् न्यूनमूल्येन वस्तूनि संस्थायै विक्रेतव्यानि भवन्ति स्म। कृषकाः निजराजस्वम् अर्पयितुं न पारयन्ति स्म। शिल्पकाराणाम् उत्पादनं न्यूनं जायते स्म कृषिकार्यं च सर्वथा नाशपथे ह्रासपथे च आसीत्।

**चित्रम् 2 -**
*बङ्गप्रान्तस्थस्य मुर्शिदाबादस्य काचित् साप्ताहिकविपणिः।*
ग्रामीणकृषकाः शिल्पकाराः च स्वोत्पादितवस्तूनि विक्रेतुं निजावश्यकवस्तूनि च क्रेतुं नियमितरूपेण महाहट्टेषु आच्छन्ति स्म। आर्थिकसङ्कटकाले एताः विपणयः कुप्रभाविताः भवन्ति स्म।





**चित्रम् 3 -**
*चार्ल्सकार्नवालिस-महोदयः।*
यस्मिन् काले स्थायिभूप्रबन्धनं क्रियान्वयितं, तस्मिन् काले कार्नवालिस-महोदयः भारतस्य राष्ट्राध्यक्षः (गवर्नरजनरल इति) आसीत्।

स्रोतः 1

**बङ्गालस्य कृषकाणां विषये कोलब्रुकस्य कथनम्**

बङ्गालस्य अनेकेषु ग्रामेषु अनेके सम्पन्नाः कृषकाः स्वयं कृषिकार्यं न कुर्वन्ति स्म। एते सम्पन्नाः कृषकाः भूम्यधिकारपत्रानुसारं (पट्टे इत्यस्मिन्) भूमिम् अन्येभ्यः यच्छन्ति स्म तथा च तेभ्यः अत्यधिकं राजस्वं स्वीकुर्वन्ति स्म। षष्ठ्यधिकाष्टादशशततमे (1860) वर्षे एच.टी.कोलब्रुकमहोदयः एतेषां कृषकाणां स्थितिम् एतैः शब्दैः प्रतिपादितवान् - आवण्टनस्य अधिकप्रतिभूतीनां (भारी शर्तें इति) पशूनां बीजानाम् आजीविकानाम् ऋणप्रत्यर्पण-चिन्ता-भारेण अभिभूताः (दबे) कृषकाः आत्मानं कदापि ऋणात् विमुक्तान् न कर्तुं शक्नुवन्ति। यदा ते जीवननिर्वाहाय पर्याप्तं धनादिकम् अपि न प्राप्नुवन्ति तदा एतस्यां स्थितौ ते मनसा कार्यं कथं कर्तुं शक्नुवन्ति। न च ते स्वस्थितेः परिवर्तनस्य काम् अपि आशां पश्यन्ति।

सप्तत्यधिकसप्तदशशततमे (1790) वर्षे जातस्य दुर्भिक्षस्य कारणात् कोट्यधिकजनाः तत्र मृत्युं प्राप्तवन्तः। एतस्मिन् दुर्भिक्षे प्रायः तृतीयांशात्मिकी जनसङ्ख्या समाप्ता जाता।

## कृषिकार्ये संशोधनस्य आवश्यकता

यदा अर्थव्यवस्था सङ्कटे आसीत् तदा किं संस्था निजराजस्वस्य आयविषये आश्वस्तः भवितुं शक्नोति स्म ? संस्थायाः अनेके अधिकारिणः अनुभूतवन्तः यत् भूमौ निवेशस्य कृषिकार्ये च संशोधनस्य आवश्यकता अस्ति।

इदं कार्यं कथं कर्तुं शक्यते स्म? एतस्मिन् विषये दशकद्वयं यावत् चर्चा प्राचलत्। अन्ततः संस्थया त्रिनवत्यधिकसप्तदशशततमे (1793) वर्षे स्थायीभूव्यवस्था अथवा स्थायी-भूप्रबन्धनव्यवस्था (बन्दोबस्त) क्रियान्वयिता । एतस्याः स्थायीभूव्यवस्थायाः (बन्दोबस्त) सन्ध्यनुसारं नृपेभ्यः जनपदाधिपतिभ्यः (तालुकादार) च भूस्वामिरूपेण मान्यता प्रदत्ता। तेभ्यः भूस्वामिभ्यः जनपदाधिपतिभ्यः च इदम् अपि दायित्वं समर्पितं यत् ते भूस्वामिनः जनपदाधिपतयः च कृषकेभ्यः राजस्वं सङ्गृह्य तद् राजस्वम् ईस्ट-इण्डिया-कम्पनी इति संस्थायै अर्पयिष्यन्ति इति। तेषां भूस्वामिभ्यः जनपदाधिपतिभ्यः च पक्षतः अर्प्यमाणराशिः स्थायिरूपेण निश्चितः आसीत्। एतस्य अभिप्रायः अयम् आसीत् यत् भविष्यति काले कदाचिद् अपि तत्र वर्धनं न स्यात्। आङ्ग्लीयैः ऊह्यते स्म यत् अनया उपर्युक्तव्यवस्थया वयं नियमितरूपेण राजस्वं प्राप्स्यामः तथा च भूस्वामिनः अपि सोत्साहं भूमेः संशोधनाय धनं व्ययीकरिष्यन्ति। आङ्ग्लीयाः एतत् अपि अनुभवन्ति स्म यत् राज्यस्य पक्षतः राजस्वस्य याचना न वर्धिष्यते अतः भूस्वामिनः वर्धमानेन उत्पादनेन लाभांशम् आधिक्येन प्राप्स्यन्ति इति।

**समस्याः**

परन्तु स्थायिभूमिप्रबन्धनात् अपि समस्या जाता। संस्थायाः अधिकारिभिः अनुभूतं यत् अधुना अपि भूस्वामिनः भूमेः गुणवत्तायाः वर्धनाय धनस्य व्ययं न कुर्वन्ति। वस्तुतः संस्थया यत् राजस्वं निर्धारितम् आसीत् एतावत् अधिकम् आसीत् यत् तस्य प्रत्यर्पणे भूस्वामिनः महत् कष्टम् अनुभवन्ति स्म इति। ये भूस्वामिनः राजस्वप्रत्यर्पणे विफलाः भवन्ति स्म तेषां भूमिः परिहीयते स्म। अनेकेषां भूस्वामिनां भूमिः संस्थया लीलामय-क्रयद्वारा विक्रीता।

एकोनविंशतिशताब्द्याः प्रारम्भिकदशकं यावत् स्थितिः परिवर्तिता। महाहट्टेषु मूल्यानि वर्धितानि अपि च शनैः शनैः कृषिक्षेत्रस्य अपि विस्तारः जातः। अनेन भूस्वामिनाम् आये तु वृद्धिः अभवत् परन्तु संस्थायाः कोऽपि लाभः न अभवत्। यतो हि संस्था तु सर्वकालाय राजस्वमात्रां निश्चितवती आसीत्। अधुना सा राजस्वे वृद्धिं न कर्तुं शक्नोति स्म।

परन्तु भूस्वामिनः अधुना अपि भूमेः उत्पादकतां वर्धयितुं रुचिं न दर्शयन्ति स्म। तेषु केचन तु भूप्रबन्धनस्य आरम्भिकवर्षेषु एव निजभूमितः च्युताः अभवन्।

➤ गतिविधिः

भवन्तः इत्थं किमर्थम् अनुभवन्ति यत् कोलब्रुकमहोदयः बङ्गप्रान्तस्य शुल्कोपजीविनां भूस्वामिनां स्थितिविषये एतावान् चिन्तितः किमर्थम् अस्ति ? गतपृष्ठान् पठित्वा संभावितकारणानि ज्ञापयतु।

ये अवशिष्टाः आसन्, ते अपि कष्टं निवेशरूपविभीषिकां च विना आयस्य आशां पश्यन्ति स्म । यावत्पर्यन्तं भूस्वामिकृषकेभ्यः भूमिं दत्त्वा तेभ्यः राजस्वं ग्रहीतुं शक्नुवन्ति स्म तावत्पर्यन्तं भूपरिष्कारस्य तेषां च चिन्ता न आसीत् ।

अपरस्मिन् पक्षे एषा दमनकारिणी व्यवस्था अस्ति इति ग्रामीणकृषकाः चिन्तितवन्तः । कृषकेण यद् ऋणं प्रत्यर्पणीयम् आसीत् तद् बहु अधिकम् आसीत् । भूमौ च तस्य अधिकारः सुरक्षितः न आसीत् । ऋणम् अर्पयितुं प्रायः उत्तमर्णात् (महाजनात्) ऋणं स्वीकरणीयं भवति स्म । यदि सः कृषकः राजस्वं प्रत्यर्पयितुं न शक्नोति स्म तर्हि सः कृषकः परम्पराप्राप्तभूमितः अधिकारच्युतः भवति स्म ।

**महाल इति** – ब्रिटिश-राजस्व-अभिलेखेषु महाल इति कश्चित् राजस्वप्रकल्पः आसीत् । एषः कश्चित् ग्रामः अथवा ग्रामसमूहः भवति स्म ।

## काचित् नूतना व्यवस्था

एकोनविंशतिशताब्दस्य आरम्भे एव संस्थायाः बहवः अधिकारिणः एतं तथ्यं प्रति आश्वस्ताः आसन् यत् राजस्व-भूप्रबन्धनव्यवस्थयोः परिवर्तनम् आवश्यकम् अस्ति । यदा संस्थायै वाणिज्यं शासनव्यवस्थां च सञ्चालयितुम् अधिकधनस्य आवश्यकता स्यात् तदा स्थायिरूपेण राजस्वं निश्चित्य संस्था कथं कार्यं चालयितुं शक्नोति ?

बङ्गालस्थस्य आङ्ग्लीयानाम् आवासीयकार्यालयस्य (बङ्गालप्रेजिडेंसी इत्यस्याः) उत्तरपश्चिमप्रान्तेभ्यः (एतस्य क्षेत्रस्य अधिकांशभागः अधुना उत्तरप्रदेशे अस्ति) होल्टमैकेंजीनामकेन आङ्ग्लीयेन काचित् एका नूतना व्यवस्था सज्जीकृता, या द्वाविंशत्यधिकाष्टादशशततमे (1822) वर्षे क्रियान्वयिता । मैकेंजिमहोदयः विश्वसिति स्म यत् उत्तरभारतीय-समाजे ग्रामः काचित् महत्त्वपूर्णा सामाजिकी संस्था अस्ति तथा च तस्याः संरक्षणम् आवश्यकम् अस्ति । तस्य मैकेंजिमहोदयस्य आदेशानुसारं जनपदाधीशैः ग्रामाणां यात्रा कृता, भूमेः परीक्षणं कृतम्, क्षेत्राणां मापनं कृतम्, तथा च विभिन्नसमूहानां रुचयः अवगताः । अधिकारिभिः ग्रामस्य प्रत्येकं क्षेत्रस्य अनुमानितं राजस्वम् आकलय्य प्रत्येकं ग्रामस्य अथवा ग्रामसमूहस्य (महाल) एकत्रितराजस्वस्य परिगणनं क्रियते स्म । एतस्याः राजस्व-व्यवस्थायाः अन्तर्गतं स्थायिरूपेण राजस्वस्य मात्रा न निश्चिता अपितु यथाकालं तत्र संशोधनं भविष्यति इति व्यवस्था स्थापिता । राजस्व-संग्रहणस्य दायित्वं भूस्वामिने अदत्त्वा ग्रामप्रमुखाय दत्तं सः ग्रामप्रमुखः तत् राजस्वं संगृह्य "ईस्ट-इण्डिया-कम्पनी" इति संस्थायै दास्यति इति व्यवस्था कृता । एतस्याः व्यवस्थायाः नामकरणं सामूहिकरूपेण ग्रामस्य स्थायीभू-प्रबन्धन-व्यवस्था (महालवारीबन्दोबस्त इति) इति कृतम् ।

**चित्रम्- 4** – मद्रासस्य राज्यपालः (गवर्नर) टामसमुनरोवर्यः (1819-1826) इति ।



## मुनरो-निर्दिष्ट-व्यवस्था

ब्रिटिशनियन्त्रितेषु दक्षिणभारतीयक्षेत्रेषु अपि स्थायिभूप्रबन्धनस्य स्थाने नूतनव्यवस्था भवेत् इति प्रयासः आरब्धः । तत्र या नूतना व्यवस्था आरब्धा सा कृषकीयव्यवस्था (रैयतवार) इति नाम्ना ख्याता । कैप्टन-एलेक्जेंडर-रीडमहोदयः टीपूसुल्तानेन सह जातयुद्धेभ्यः पश्चात् संस्थाद्वारा अधिकृतेषु केषुचित् क्षेत्रेषु स्वव्यवस्थां स्थापयित्वा अपि दृष्टवान् आसीत् । टामसमुनरोद्वारा एषा व्यवस्था विकसिता शनैः शनैः च सम्पूर्णे दक्षिणभारते एव एषा व्यवस्था क्रियान्वयिता ।

रीडमहोदयः मुनरोमहोदयः च अनुभवतः स्म यत् दक्षिणभारते परम्परागताः भूस्वामिनः न आसन् इति । अतः तयोः तर्कः आसीत् यत् तादृशैः कृषकैः एव भूप्रबन्धनं (बन्दोबस्त) कारणीयं यैः वंशपरम्परया कृषिकार्यं क्रियते ।

> ➤ **गतिविधिः**
>
> कल्पयन्तु यत् भवान् संस्थायाः प्रतिनिधिरूपेण संस्थाशासनस्य अन्तर्गतं ग्रामीणक्षेत्राणां स्थितिम् अभिलक्ष्य काञ्चित् समाख्याम् इङ्ग्लैण्डं प्रेषयति । भवान् समाख्यायां किं लेखिष्यति ?

राजस्वस्य आकलनात् प्राक् तेषां क्षेत्राणां सावधानं पृथक्तया च सर्वेक्षणं करणीयं स्यात् । मुनरोवर्यः मन्यते स्म यत् आङ्ग्लीयैः पितृवत् कृषकाणां रक्षा करणीया ।

## सर्वं समीचीनं न आसीत्

नूतनव्यवस्थानां क्रियान्वयनात् पश्चात् मात्रं केषाञ्चित् वर्षाणाम् आभ्यन्तरे एव तत्र समस्याः पुरतः समायाताः । भूमेः जायमानम् आयं वर्धयितुं राजस्वाधिकारिणः आधिक्येन राजस्वं सुनिश्चितवन्तः । कृषकाः राजस्वम् अर्पयितुं न पारयन्ति स्म , अतः कृषकाः ग्रामात् प्लायन्ते स्म । बहुषु क्षेत्रेषु ग्रामाः जनशून्याः अभवन् । आशावादिनः अधिकारिणः आशासते स्म यत् नूतनव्यवस्थया कृषकाः सम्पन्नाः उद्यमशीलाः च भविष्यन्ति इति । परन्तु तथाविधं किम् अपि न अभवत् ।

## यूरोपीयदेशान् अभिलक्ष्य सस्यानाम् उत्पादनम्

आङ्ग्लीयैः एतत् अपि अनुभूतं यत् ग्रामीणक्षेत्राणि न केवलं राजस्वं दास्यन्ति अपितु यूरोपीयदेशानाम् आवश्यकतानुगुणं समीचीनतया सस्यानि अपि अत्र उत्पादयितुं शक्नुवन्ति । अष्टादशशताब्दस्य अन्तपर्यन्तं "ईस्ट-इण्डिया-कम्पनी" इति संस्था अफेनस्य (अफीम) नीलस्य च सस्यस्योत्पादने बलं प्रायुनक् । तदनन्तरं प्रायः सार्धैकशतं (150) वर्षाणि यावत् आङ्ग्लीयाः निरन्तरं देशस्य विभिन्नभागेषु कस्यचित् विशिष्टस्य सस्यस्य उत्पादनाय कृषकान् बाध्यान् अकुर्वन् – तद्यथा बङ्गप्रान्ते शणम् (पटसन), असमप्रान्ते चायम्, संयुक्तप्रान्ते (वर्तमानोत्तरप्रदेशे) इक्षुः, पञ्चनदे गोधूमाः, महाराष्ट्र-पञ्चनदयोः कार्पासम्, मद्रासे तण्डुलाः च इति ।

उपर्युक्तम् एतत् सर्वम् आङ्ग्लीयैः कथं कृतम् ? आङ्ग्लीयाः स्वावश्यकतानुरूपं सस्यानां कृषिकार्यं वर्धयितुं प्रसारयितुं च नूतनविधीः अङ्गीकृतवन्तः । आगच्छन्तु, सस्योत्पादनस्य एवंविधां काञ्चित् पद्धतिं समीचीनतया अवगच्छामः ।

## किं रङ्गाणाम् अपि कश्चित् इतिहासः अस्ति ?

पञ्चमे षष्ठे च चित्रे कौशेयवस्त्राणां मुद्रिते द्वे चित्रे प्रदत्ते स्तः । वामतः पञ्चमे चित्रे भारतदेशस्थस्य आन्ध्रप्रदेशस्य तन्तुवायैः निर्मितानि कलमकारिमुद्रितानि चिह्नानि दृश्यन्ते । अपरतः ब्रिटेनस्य प्रसिद्धकविना कलाकारेण च विलियम-मारिसद्वारा निर्मितानि पुष्पचित्राणि सन्ति । द्वयोः विलिखितचित्रयोः एकया दृष्ट्या समानता अस्ति । द्वयोः मुद्रितचित्रयोः एव गभीरनीलवर्णस्य प्रयोगः अस्ति । सामान्यरूपेण एषः नीलवर्णः इति उच्यते । किं भवन्तः जानन्ति यत् एषः वर्णः कथम् उत्पादितः इति ?



चित्रम् (5) - एकः कलमकारिमुद्रणम्, विंशतिशताब्दः, भारतम् ।



चित्रम् (6) – मारिस-काटन-मुद्रणम्, एकोनविंशतिशताब्दस्य उत्तरार्द्धम्, इंग्लैण्डदेशः ।

एतेषु चित्रेषु भवद्भिः यः नीलवर्णः दृश्यते सः नीलनामकात् कस्माच्चित् पादपात् निष्कास्यते स्म । सम्भाव्यते यत् एकोविंशतिशताब्दीये ब्रिटेनदेशे मारिस-महोदयस्य चित्रेषु प्रयुक्तः नीलवर्णः भारतदेशे जायमाननीलपादपैः एव निर्मितः स्यात् । तस्मिन् काले भारतदेशः विश्वे नीलस्य महत्तमः स्रोतोरूपः आसीत् ।

## भारतीयनीलस्य याचना किमर्थम् आसीत् ?

नीलपादपः मुख्यरूपेण उष्णकटिबन्धीयक्षेत्रेषु उत्पद्यते । त्रयोदशशताब्दं यावत् फ्रांसब्रिटेनयोः वस्त्रोत्पादकाः वस्त्ररङ्गनाय भारतीयनीलस्य एव प्रयोगं कुर्वन्ति स्म ।

तस्मिन् काले भारतीयनीलः व्यापकमात्रया यूरोपीयमहाहट्टेषु न प्राप्नोति स्म । तस्य मूल्यम् अपि बहु अधिकं भवति स्म । अतः यूरोपीयवस्त्रोत्पादकाः वृन्ताक-सदृश-नीलवर्णं निर्मातुं वोडनामके विशिष्टपादपे एव आश्रिताः भवन्ति स्म । "वोडपादपः" शीतोष्णक्षेत्रे प्रादुर्भवति स्म, अतः यूरोपे सरलतया लभ्यते स्म । उत्तरी-इटली-दक्षिणीफ्रांस-जर्मनी-ब्रिटेनदेशानाम् अनेकभूभागेषु एषः पादपः जायते स्म । नीलेन सह प्रतिस्पर्धाकारणात् कष्टपतिताः यूरोपीयाः वोडोत्पादकाः स्वसर्वकारस्य उपरि बलाघातम् अकुर्वन् यत् सर्वकारः नीलस्य आयाते प्रतिबन्धं स्थापयेत् इति ।

**उद्यानम् (बागान)** – कञ्चित् विशालक्षेत्रं यस्मिन् उद्यानस्वामी बहुभिः जनैः बलात् कार्यं कारयति स्म । कफघ्नी-इक्षु-तम्बाखु-चाय-कार्पासादिविषये उद्यानानां विषये चर्चा क्रियते ।

परन्तु वस्त्ररञ्जकः तु केवलं नीले एव रुचिं वहन्ति स्म । यतो हि तैः वस्त्ररञ्जकैः नीलद्वारा अतीव चकासमान-नीलवर्णः प्राप्यते स्म, अपरञ्च वोडतः प्राप्यमाणवर्णः द्युतिरहितः अरोचकः च भवति स्म । तत्रत्यसर्वकारेण सप्तदशशताब्दं यावत् नीलस्य आयाते यः प्रतिबन्धः स्थापितः आसीत् तत्र शिथिलतां दातुं यूरोपीयवस्त्रोत्पादकाः सर्वकारं स्वपक्षे कृतवन्तः । कैरीबियायी-द्वीपसमूहे स्थिते सेण्ट-डामिंग्यू इत्यस्मिन् फ्रांसीसिजनाः, ब्राजीले पुर्तगालिनः, जमैकायां ब्रिटिशाः, बेनेजुएलायां स्पैनिशजनाः, नीलकृषिम् आरब्धवन्तः । उत्तर-अमेरिकायाः अपि अनेकेषु भूभागेषु नीलोद्यानानि विद्यमानानि आसन् ।

अष्टादशशताब्दस्य समाप्तिं यावत् भारतीयनीलस्य याचना आधिक्येन सर्वत्र जाता । ब्रिटेने औद्योगिकीकरण-युगस्य आरम्भः अभवत् कार्पासस्य उत्पादने आधिक्येन वर्धनम् अभवत् । अधुना वस्त्ररागस्य (रंगाई) याचना च तीव्रतया वर्धिता । यदा नीलस्य याचना वर्धिता तदा वेस्ट-इण्डीज-अमेरिकाभ्यः यः नीलपदार्थः लभ्यते स्म अनेककारणैः तस्य आपूर्तिः प्रतिबन्धिता । त्र्यशीत्यधिकसप्तदशशततमात् (1783) वर्षाद् आरभ्य एकोननवत्यधिकसप्तदशशततमवर्षस्य (1789) मध्ये विश्वे नीलोत्पादनम् अर्धं जातम् । ब्रिटेनस्य वस्त्ररञ्जकाः अधुना नीलस्य आपूर्तये व्यग्रतया कस्यचित् अन्यस्रोतसः अन्वेषणं कुर्वन्ति स्म ।

एषः नीलपदार्थः कुतः लब्धुं शक्यते स्म ?

## ब्रिटेनस्य भारतदेशं प्रति वर्धमाना रुचिः

यूरोपे नीलस्य वर्धितयाचनां दृष्ट्वा "ईस्ट-इण्डिया-कम्पनी" इति संस्था अपि भारते नीलकृषिः व्यापकमात्रया भवेत् इति नूतनमार्गम् अन्वेष्टुम् आरभत ।



**चित्रम् 7 -**
*सेण्ट-डामिंग्यू इत्यस्मिन् क्रीतदासानां विद्रोहः, अगस्तमासः एकनवत्यधिकसप्तदशशततम-वर्षम् (1791), जनवरी-स्कुहदोल्स्की इत्यस्य चित्रम्।*

अष्टादशशताब्दस्य अन्तिमदशकात् आरभ्य एव बङ्गप्रान्ते नीलसस्यस्य उत्पादनं तीव्रतया अभवत्। बङ्गप्रान्ते उत्पन्ननीलः विश्वस्य महाहट्टेषु प्रसृतवान्। अष्टाशीत्यधिकसप्तदशशततमे वर्षे (1788) ब्रिटेनद्वारा आयातिते नीलपदार्थे भारतीयनीलस्य भागः प्रायः त्रिशंत्प्रतिशतम् (30) इति आसीत्। दशाधिकाष्टादशशततमे वर्षे (1810) ब्रिटेनद्वारा आयातिते नीलपदार्थे भारतीयनीलस्य भागः पञ्चनवतिप्रतिशतम् (95) अभवत्। कालक्रमेण यथा नीलस्य वाणिज्यं विस्तारं गतम्, "कम्पनी" इति संस्थायाः अधिकारिणः व्यावसायिकसचिवाः च नीलस्य उत्पादने धननिवेशं कर्तुम् आरब्धवन्तः। समयस्य अन्तराले संस्थायाः अनेके अधिकारिणः नीलस्य स्वस्मिन् उद्योगे वाणिज्ये वा अवधानं कर्तुं कम्पनी इति संस्थायाः सेवाकार्यं त्यक्तवन्तः। अत्यधिकलाभांशम् अर्जयितुं स्काटलैरण्डस्य इङ्ग्लैण्डस्य च अनेके जनाः भारतम् आगतवन्तः तथा च तैः नीलोद्यानानि विकासितानि। येषां पार्श्वे नीलोत्पादनाय धनं न आसीत्, संस्थायाः नूतनवित्तकोशाः तेभ्यः ऋणरूपेण धनं दातुं सन्नद्धाः तिष्ठन्ति स्म।

अष्टादशशताब्दे फ्रांसीयाः उद्यानस्वामिनः कैरीबियाई-द्वीपसमूहे स्थिते "फ्रांसदेशस्य सेण्ट-डामिंग्यू" इति नामके उपनिवेशे नीलस्य शर्करायाः च उत्पादनम् आरब्धवन्तः। एतेषु उद्यानेषु कार्यकर्तारः अफ्रीकीयाः क्रीतदासाः एकनवत्यधिकसप्तदशशततमे (1791) वर्षे विद्रोहम् आरब्धवन्तः। तैः क्रीतदासैः उद्यानानि ज्वालितानि, स्वीयाः धनाढ्याः स्वामिनः च हताः। द्विनवत्यधिकसप्तदशशततमे (1792) वर्षे स्वोपनिवेशेषु दासप्रथा समाप्ता। एताभ्यः घटनाभ्यः कैरीबियाई-द्वीपसमूहेषु नीलस्य कृषिकार्यं सर्वथा समाप्तम्।

## नीलस्य कृषिकार्यं कथं भवति स्म ?

नीलस्य कृषिं कर्तुं मुख्यतः द्वौ उपायौ आस्ताम् – निजोपायः अपरश्च कृषकीयोपायः (रैयती)। निजकृषेः व्यवस्थान्तर्गतम् उद्यानस्वामिनः स्वयं स्वभूमौ नीलस्य उत्पादनं कुर्वन्ति स्म। एकतः तु ते भूमिं क्रीणन्ति स्म अपरतः च भूस्वामिभ्यः भाटकस्योपरि भूमीः स्वीकुर्वन्ति स्म श्रमिकान् च अपि कार्ये नियोज्य नीलस्य कृषिकार्यं कारयन्ति स्म।

## निजकृषिकार्ये समस्याः

उद्यानस्वामिनः निजकृषिकार्यं कर्तुं तत् कार्यं च विस्तारयितुं समस्याः अनुभवन्ति स्म। नीलसम्बद्धकृषिकार्यं केवलम् उर्वराभूमौ एव कर्तुं शक्यते स्म। एतादृशेषु भूखण्डेषु पूर्वतः एव व्यापक-जनसंख्या आसीत्। तत्र ते लघुक्षेत्राणि एव प्राप्नुवन्ति स्म। तेभ्यः नीलस्य कृषिकार्याय विशालभूक्षेत्राणाम् आवश्यकता आसीत्। एतादृशान् भूखण्डान् ते कुतः कथं च प्राप्तुं शक्नुवन्ति स्म ? ते नीलयन्त्रागारस्य समीपे एव भाटकस्य उपरि भूखण्डान् भूमिं च प्राप्तुं प्रयत्नं कृतवन्तः तदर्थं च तत्रत्यान् कृषकान् एव ततः अपसारितवन्तः। एतस्मात् कारणात् तत्र विघट्टनं विरोधः अवसादस्थितिः च जायते स्म।

श्रमिकाणां प्रबन्धनम् अथवा व्यवस्था अपि सरलतया न भवति स्म। विशालोद्यानाय अनेकेषां श्रमिकाणाम् आवश्यकता भवति स्म, श्रमिकाणां च आवश्यकता अपि तस्मिन् काले एव आधिक्येन भवति स्म यस्मिन् काले कृषकाः धान्यस्य कृषिकर्मणि व्यस्ताः भवन्ति स्म।

**क्रीतदासः (गुलाम)** – एतादृशः जनः यः कस्यचित् क्रीतदासस्वामिनः सम्पत्तिरूपः भवति। सः क्रीतदासः इति कथ्यते। क्रीतदासस्य पार्श्वे स्वातन्त्र्यं न भवति, तेन केवलं स्वस्वामिने कार्यं करणीयं भवति।

व्यापकमात्रया निजकृषिकार्यार्थम् अनेकेषां वृषभाणां हलादीनां च आवश्यकता भवति स्म । एकबीघा-परिमित-भूमौ नीलकृषिकार्याय हलद्वयम् आवश्यकं भवति स्म । एतस्य अयम् अभिप्रायः आसीत् यत् यदि कस्यचित् उद्यानस्वामिनः पार्श्वे एकसहस्रं बीघापरिमिता भूमिः अस्ति, तर्हि तस्मै द्विसहस्रस्य हलानाम् आवश्यकता आसीत् । हलानां क्रयणं तेषां संरक्षणं च एका महती समस्या आसीत् । कृषकेभ्यः अपि अपेक्षानुगुणं हलाः न प्राप्यन्ते स्म । यतो हि कृषकेभ्यः अपि हलादिवस्तूनाम् आवश्यकता भवति स्म । यस्मिन् काले नीलोत्पादकाः आवश्यकताम् अनुभवन्ति स्म, तस्मिन् काले एव कृषकाणां हलाः वृषभाः च अपि धान्यकृषिकार्ये व्यस्ताः भवन्ति स्म ।

एकोनविंशतिशताब्दस्य समाप्तिं यावत् उद्यानस्वामिनः निजकृषिक्षेत्रं विस्तारयितुं सङ्कोचयन्ति स्म । एतस्याः व्यवस्थायाः अन्तर्गतं नीलस्य उत्पादनाय पञ्चविशति-प्रतिशतम् इत्यस्मात् अपि न्यूनभूमिः तेषां भागे आयाति स्म । शिष्टा भूमिः कृषकीव्यवस्थायाः (रैयती इति व्यवस्थायाः) अन्तर्गता आसीत् ।

## कृषकाणां भूमौ नीलस्य कृषिकार्यम्



कृषकीयव्यवस्थायाः अन्तर्गतम् उद्यानस्वामिनः कृषकैः (रैयत इति)सह कञ्चित् अनुबन्धं (सट्टा इति ) स्थापयन्ति स्म । ते उद्यानस्वामिनः अनेकधा कृषकाणां पक्षतः ग्रामप्रमुखान् अपि सन्ध्यर्थं बाध्यान् कुर्वन्ति स्म, ये अनुबन्धपत्रे हस्ताक्षराणि कुर्वन्ति स्म तेभ्यः उद्यानस्वामिनः नीलोत्पादनाय अल्पकुसीदेन प्रत्यक्ष-ऋणं यच्छन्ति स्म । अधमर्णकृषकैः न्यूनातिन्यूनं पञ्चविंशत्यां (25) प्रतिशतं भूमौ नीलस्य उत्पादनं करणीयं भवति स्म । उद्यानस्वामिनः कृषकाणां कृते बीजोपकरणादि-व्यवस्थां कुर्वन्ति स्म, अपरञ्च मृत्तिकायाः समीकरणस्य संशोधनस्य बीजवपनस्य सस्यसंरक्षणस्य च दायित्वं कृषकाणां भवति स्म ।

**चित्रम् 8** - एकोनविंशतिशताब्दस्य (21) आरम्भे बङ्गालस्य श्रमिकाः नीलस्य कृषिकार्यं कुर्वन्तः सन्ति ।

भारते नीलस्य पादपानां कर्तनम अधिकांशतः पुरुषाः एव कुर्वन्ति स्म ।

यदा सस्यकर्तनस्य पश्चात् सस्यम् उद्यानस्वामिभ्यः प्रत्यर्प्यते स्म तदा कृषकः नूतनम् ऋणं प्राप्नोति स्म पुनः च सा एव चक्रकव्यवस्था पौनःपुन्येन प्रारभते स्म ।



**चित्रम् 9** - क्षेत्रेभ्यः उद्योगयन्त्रागारं (कारखाना इति ) प्रति नीयमानाः नीलचयाः इति ।

## नीलस्य उत्पादनं कथं भवति स्म ?



**चित्रम् -10 -** नीलस्य क्षेत्राणां समीपे स्थितस्य नीलस्य किञ्चित् उद्योगागार-गृहम्, विलियम-सिंप्सनद्वारा रचितं चित्रम्, त्रिष्ट्यधिकाष्टादशशततमे वर्षे (1863).



**चित्रम् 11-** महिलाः एव नीलस्य पादपान् कुण्डानि यावत् उढ्वा आनयन्ति स्म ।

प्रायः नील-ग्रामाः उद्यानस्वामिनाम् उद्योगागारगृहाणां समीपे एव भवन्ति स्म । नीलपादपाः कर्तनात् पश्चात् उद्योगयन्त्रागारस्थिते कुण्ठे (वैटस हौद इत्यस्मिन्) एव प्राप्यन्ते स्म । रङ्गस्य निर्माणाय त्रिचतुर्णां कुण्डानाम् आवश्यकता भवति स्म । प्रत्येकं कुण्डस्य पृथक्कार्यं भवति स्म । नीलपादपाणां पत्राणि त्रोटयित्वा आदौ एकस्मिन् कुण्डे तानि चिरकालं यावत् निमज्यन्ते स्म ( एतत् कुण्डम् (हौद) नील-किणवण-कुण्डम् अथवा "स्टीपरकुण्डम्" इति उच्यते स्म) । यदा पादपाः किणविताः भवन्ति स्म तदा द्रव्ये बुद्बुदाः जायन्ते स्म, अधुना सन्दूषितानि (सडे हुए) पत्राणि ततः निष्कास्यन्ते स्म अपि च द्रवभागः एतस्मिन् कुण्डे परिशोध्यते स्म । अपरं कुण्डं प्रथमकुण्डस्य साक्षात् नीचैः भवति स्म ।

**चित्रम्-12-**
कुण्डे द्रवीभूतपदार्थस्य आलोडयिता



अत्र स्थितः नीलश्रमिकः कुण्डे स्थापित-द्रवमय-नीलपदार्थस्य आलोडनाय प्रयुक्तपैडलयन्त्रं स्वीकृत्य तिष्ठति । एतादृशैः श्रमिकैः अष्टाभ्यः होराभ्यः अपि अधिककालं यावत् आकटिभागं यावत् पूर्णे नीलद्रव्यपात्रे स्थातव्यं भवति स्म ।

**वाट इति** – एकं किणवनपात्रम् अथवा सङ्ग्रहणपात्रम् ।

अपरस्मिन् कुण्डे (बीटर-वाट इत्यस्मिन्) एषः द्रवपदार्थः निरन्तरम् आलोड्यते स्म अपि च "पैडल" इति यन्त्रेण परिभ्राम्यते स्म यदा एतत् द्रव्यं हरितं तदनन्तरं च नीलवर्णीयं भवति स्म, तदा कुण्डे चूर्णक-जलं (चूना) निपात्यते स्म । शनैः शनैः नील-वलयाः तुषारकणाः नील-सतहाः वा (पपडियां / परतें) अधः सघनीभूताः परिश्लिष्टाः वा भवन्ति स्म, तत्र च उपरि परिशोधितद्रव्यम् उद्गच्छति स्म । द्रव्यं परिशोध्य पृथक्क्रियते स्म, अधस्तनीयः च एकत्रीभूतः नीलद्रवाशेषः – नीलस्य संयावरूपनीलपदार्थः च – अपरस्मिन कण्डे (निथारन-कण्डे) निपात्यते स्म । तदनन्तरं तादृशः सः पदार्थः निष्पीड्य विक्रयणाय शोष्यते स्म ।



**चित्रम् -13-** विक्रयणाय नीलं सिद्धम् अस्ति ।

अत्र भवन्तः उत्पादनस्य अन्तिमावस्थां द्रष्टुं शक्नुवन्ति । प्रारूपपात्रेषु (सांचा इति ) नीलं निष्पीड्य नीलस्य संयावरूपं खण्डं कर्तयित्वा श्रमिकाः खण्डशः च विभज्य तेषु मुद्राङ्कणं कुर्वन्ति । कश्चित् श्रमिकः उपरि प्रदत्तस्थचित्रस्य पृष्ठतनीये भागे एतान् खण्डान् शोषयितुं नयति ।

ये कृषकाः पूर्वम् एतैः ऋणैः आकृष्टाः भवन्ति स्म ते अधुना अवगतवन्तः यत् एषा व्यवस्था अतिजटिला अस्ति। अस्माभिः नीलस्य यत् मूल्यं प्राप्यते तत् बहुन्यूनम् अस्ति, ऋणसम्बद्धा च एषा चक्रकव्यवस्था न कदापि समाप्तिं याति इति।

समस्याः अन्याः अपि आसन्। उद्यानस्वामिनः इच्छन्ति स्म यत् कृषकाः स्वस्य समीचीनतमेषु क्षेत्रेषु एव नीलस्य कृषिं कुर्वन्तु। परन्तु नीलविषयिणी समस्या एषा आसीत् यत् तेषां नीलपादपानां मूलानि बहुगभीराणि भवन्ति स्म तानि च मृत्तिकायाः सम्पूर्णाम् ऊर्वरकतां शोषयन्ति स्म। नीलस्य कर्तनात् परं तत्र धान्यस्य कृषिः न कर्तुं शक्यते स्म।

### "नीलविद्रोहः" तदनन्तरकालीना च स्थितिः

एकोनषष्ट्यधिकाष्टादशशततमस्य (1859) वर्षस्य मार्चमासे च बङ्गप्रान्तस्य सहस्राधिकाः कृषकाः नीलस्य कृषिं न करिष्यामः इति उक्तवन्तः। यथा विद्रोहः विस्तारं गतः, तथा कृषकाः उक्तवन्तः यत् वयम् उद्यानस्वामिभ्यः करं न दास्यामः। ते खड्गैः कुन्तैः शरादिभिः च नीलोद्योगकार्यागाराणि अभिलक्ष्य आक्रमणम् आरब्धवन्तः। महिलाः स्वगृहपात्राणि दात्राद्युपकरणानि च आदाय युद्धे भागं नीतवत्यः। उद्यानस्वामिनां सन्निधौ ये जनाः कार्यं कुर्वन्ति स्म क्रान्तिकारिभिः तादृशानां जनानाम् अपि सामाजिकरूपेण बहिष्कारः कृतः। उद्यानस्वामिनां पक्षतः ये राजस्वसचिवाः राजस्वं सङ्ग्रहीतुं गच्छन्ति स्म तेषाम् अपि क्रान्तिकारिभिः ताडनं कृतम्। कृषकैः शपथः नीतः यत् ते न तु नीलकृषिकार्याय ऋणं स्वीकरिष्यन्ति न च उद्यानस्वामिभिः नियुक्तसैनिकेभ्यः भयं प्राप्स्यन्ति इति।

नीलकृषकाः मौनेन स्थातुं सन्नद्धाः न आसन्। किमर्थम् ? ते विद्रोहाय शक्तिं कुतः प्राप्नुवन्तः ? अत्र कश्चित् अपि सन्देहः नास्ति यत् नीलकृषिकार्यम् अत्यन्तं दमनात्मकम् आसीत्। परन्तु ये जनाः पराभूताः पराधीनाः च भवन्ति ते सदैव विद्रोहं न कुर्वन्ति इति। एतादृशं कदाचित् एव भवति।

एकोनषष्ट्यधिकाष्टादशशततमे (1859) वर्षे नीलकृषकाः अनुभूतवन्तः यत् ते विद्रोहे उद्यानस्वामिनां स्थानीयभूस्वामिनां प्रमुखाणां चापि समर्थनं प्राप्तुं शक्नुवन्ति। ये प्रमुखाः अनेकेषु ग्रामेषु बलात् नीलानुबन्धे हस्ताक्षराणि कर्तुं बाध्याः कृताः तादृशाः प्रमुखाः एव नीलकृषकान् संघीकृत्य दण्डधारिभिः सह युद्धं कारितवन्तः। अनेकेषु स्थानेषु भूस्वामिनः कृषकान् विद्रोहाय प्रेरितवन्तः। ग्रामं ग्रामं गत्वा ते एतत् कार्यं कृतवन्तः। भूस्वामिनः एतस्मात् खिन्नाः आसन् यत् उद्यानस्वामिनां शक्तेः विस्तारः निरन्तरं भवति तथा च उद्यानस्वामिनः चिरकालात् बलात् च तेभ्यः भूमिम् अधिगृह्णन्ति स्म।

नीलकृषकाः एतद् अपि अनुभवन्ति स्म यत् आङ्ग्लसर्वकारः अपि अस्मिन् सङ्घर्षे तेषां साहाय्यं करिष्यति। सप्तपञ्चाशदधिकाष्टादशशततमात् (1857) विद्रोहात् परं ब्रिटिशसर्वकारः अन्यायाः विद्रोहस्य विभीषिकायाः भीतः आसीत्। यदा नीलकृषियुक्तजनपदेषु विद्रोहस्य इतोऽपि काचित् सूचना प्रसरिता तदा लेफ्टिनेण्ट-गवर्नरपदवाच्यः अधिकारी एकोनषष्ट्यधिकाष्टादशशततम-वर्षीये (1859) शीतकाले क्षेत्राणि परिभ्रमितवान्। कृषकाः अनुभूतवन्तः यत् सर्वकारः कृषकाणां दुर्दशातः खिन्नः अस्ति। प्रावृषि न्यायाधीशेन ऐशले-ईडनवर्येण काचित् अधिसूचना दत्ता, यत्र उक्तम् आसीत् यत् कृषकाः नीलानुबन्धं मन्तुं बाध्याः न करिष्यन्ते इति।

**स्रोतः -२**

**नीलग्रामगीतम्**

जनाः सङ्घर्षक्षणेषु परस्परम् उत्साहं विवर्धयन्तः ऐक्यभावं च जनयितुं प्रायः गीतानि गायन्ति। एतादृशैः गीतैः वयं तेषां मनोगतभावानां विषये अवजानीमः। नीलविद्रोहकाले बङ्गप्रान्तस्य निम्नवर्तिक्षेत्रेषु एतादृशानि बहूनि गीतानि श्रूयन्ते स्म। तेषु एकं गीतम् इत्थम् आसीत् –

ईश! (मौला) "हाती" इति पदवाच्यस्य उद्यानस्वामिनः दीर्घतमाः यष्टयः दूरे संघीभूय अपतन्,

कोलकात्तानगरीयाः लिपिकाः एतत् युद्धं द्रष्टुं नौकाभिः प्राप्तवन्तः।

अधुना तु सर्वे कृषकाः सज्जाः सन्ति, ते मौनपूर्वकं ताडनं न सहिष्यन्ते।

अधुना ते कृषकाः यष्टिधारिभिः सह पारस्परिकं युद्धम् अकृत्वा प्राणान् न त्यक्ष्यन्ति।

एतस्य वृत्तान्तस्य आधारेण जनेषु एषा सूचना प्रसृता यत् राज्ञीविस्टोरिया नीलकृषिकार्यं न भवेत् इति सूचनां दत्तवती । ईडनमहोदयः कृषकान् शमयितुं विस्फोटकस्थितीः च नियन्त्रयितुं प्रयतते स्म । तया विस्टोरियया यः आदेशः दत्तः तद्विषये कृषकाः चिन्तितवन्तः यत् अस्माकं विद्रोहस्य एव सा समर्थनम् अकरोत् ।

यथा विद्रोहः प्रसरितः, कलकत्तानगरस्य सुशिक्षिताः जनाः अपि "नील"जनपदान् प्रति प्रस्थितवन्तः । तादृशैः सुशिक्षितैः जनैः कृषकाणां दुर्दशायाः उद्यानस्वामिभिः च तेषाम् उपरि क्रियमाणस्य बलात्कारस्य अत्याचारिनीलव्यवस्थायाः च विषये लिखितम् ।

एतेन विद्रोहेण खिन्नमनाः सर्वकारः उद्यानस्वामिनां रक्षार्थं सेनाम् आह्वयत् । नीलोत्पादनस्य व्यवस्थायाः निरीक्षणाय एकः "नीलायोगः" अपि स्थापितः । एतेन "नील" आयोगेन निर्णीतं यत् उद्यानस्वामिनः दोषिणः सन्ति, बलात्कारपूर्वकं ते श्रमिकैः कार्याणि कारयन्ति एतदर्थं तेषाम् आलोचनम् अपि कृतम् । आयोगेन कथितं यत् नीलकृषिद्वारा कृषकाः लाभं न प्राप्नुवन्ति । आयोगेन कृषकाः उक्ताः यत् ते वर्तमानानुबन्धान् पूर्तिं नयन्तु, परन्तु अग्रे यदि ते इच्छन्ति तर्हि नीलकृषिकार्यस्य स्थगनम् अपि कर्तुं शक्नुवन्ति ।

एतस्य विद्रोहस्य पश्चात् उद्यानेषु नीलस्य उत्पादनं सर्वथा नष्टम् । तदनन्तरम् उद्यानस्वामिनः बिहारस्य उपरि अवधानं कृतवन्तः । एकोनविंशतिशताब्दस्य (21) अन्ते कृत्रिम-रङ्गानां निर्माणम् आरब्धम् । तस्मात् "नील"व्यवसायः अतीव प्रभावितः । पुनरपि उद्यानस्वामिनः नीलस्य उत्पादनं वर्धयितुं च सफलाः । यदा महात्मगान्धी दक्षिणाफ्रीकातः स्वदेशं प्रत्यागतः तदा बिहारस्य कश्चित् कृषकः तं चम्पारणम् आगन्तुं नीलकृषकाणां दुर्दशां च द्रष्टुम् आहूतवान् । सप्तदशाधिक-एकोनविंशतिशततमे (1917) वर्षे महात्मगान्धिनः एषा चम्पारण-यात्रा नीलोद्यानस्वामिनः विरुध्य "चम्पारण"आन्दोलनस्य रूपेण आरब्धा ।

स्रोतः-३

### भिक्षाटनं करिष्यामि परन्तु "नीलोत्पादनं न करिष्यामि"

चान्दपुरम्, थानाहरदी इत्यस्य हाजीमुल्लानामधेयेन केनचित् नीलकृषकेण सह मङ्गलवासरे जूनमासस्य पञ्चमे दिनाङ्के षष्ठ्यधिकाष्टादशशततमे (1860) च वर्षे आयोगसदस्याः वार्तालापम् अकुर्वन् ।

हाजीमुल्लाः केषाञ्चित् प्रश्नानाम् प्रत्युत्तरे इत्थं प्रतिपादितवान् –

**डब्ल्यू.एस.सीटनकारः, "नील"आयोगस्य अध्यक्षः** – किं भवान् नीलकृषिकार्याय सज्जः अस्ति ? यदि नैव, तर्हि कासां प्रतिभूतीनाम् अथवा सन्धीनाम् अनुगुणं कृषिकार्यं कर्तुम् एषिष्यति ?

**हाजीमुल्लाः** - अहं नीलस्य उत्पादनाय सज्जः नास्मि । अहं न जाने यत् काऽपि नूतना प्रतिभूतिः मां सन्तुष्टं कर्तुं शक्नोति ।

**श्रीसालेवर्यः**- किं भवान् प्रत्येकं चयस्य प्रतिवर्तं एकरूप्यकस्वीकरणेन अपि कृषिकार्यं न कर्तुम् इच्छति ?

**हाजीमुल्ला** – नैव, अहं न कर्तुं शक्ष्यामि । नीलस्य उत्पादनं परित्यज्य अहं किमपि अन्यत् कार्यार्थम् अन्यत्र गमिष्यामि । भैक्ष्यम् आचरिष्यामि परन्तु नीलोत्पादनं न करिष्यामि ।

"नील" आयोग-समाख्या,खण्डः-२,सबूतनामा इति ,पृ.६७ ।

## ➤ गतिविधिः

कल्पनां कुर्वन्तु, भवन्तः नीलायोगस्य समक्षे साक्ष्याणि प्रस्तुवन्ति । डब्ल्यू. एस.सीटनकर-महोदयः भवन्तं पृच्छति – " कृषकाः कस्याम् अवस्थायां नीलस्य कृषिं कर्तुं शक्नुवन्ति ? " भवतां प्रत्युत्तरं किं भविष्यति ?

## अन्यत्र –

### वेस्ट-इण्डीज-देशे नीलोत्पादनम्

अष्टादशशताब्दस्य आरम्भे केनचित् फ्रांसदेशीयेन धर्मप्रचारकेण जौं-बेपतिस्त-लबात-महोदयेन कैरीबियायी-द्वीपानां भ्रमणं कृतम् । भ्रमित्वा तेन एतस्य क्षेत्रस्य विषये विस्तरेण लिखितम् । इदं चित्रं लबातमहोदयस्य कस्माच्चित् पुस्तकात् गृहीतम् अस्ति । एतस्मिन् चित्रे अत्रत्येषु फ्रांसीयेषु उद्यानेषु नीलोत्पादनस्य सर्वाः प्रक्रियाः दर्शिताः सन्ति । वामभागे भवन्तः द्रष्टुं शक्नुवन्ति यत् क्रीतदासश्रमिकाः नीलपादपानां चयान् "सेटलरवट" इत्यस्मिन् पात्रविशेषे निपातयन्ति । कश्चित् अन्यः श्रमिकः केनचित् यन्त्रीय-वयन-चक्रेण द्रवपदार्थं (घोल इत्येतं) परिभ्रामयति । दक्षिणतः द्वितीयः श्रमिकः अपि ताम् एव क्रियां करोति । द्वौ श्रमिकौ नीलस्य सघनीभूतपदार्थं (लुगदी इत्येतम्) गोणीषु प्रपूर्य शोषयितुं नयतः । अग्रिमभागे द्वौ श्रमिकौ नीलस्य सघनीभूतपदार्थम् अथवा आर्द्रगोलकम् (लुगदी) मेलयित्वा प्रारूपयन्त्रेषु (सांचा इति ) निपातयितुं सज्जीकुरुतः । चित्रस्य मध्ये उद्यानस्वामी उन्नतस्थाने स्थित्वा सर्वेषां क्रीतदासानां निरीक्षणं करोति ।



## पुनः स्मरन्तु –

१. निम्नलिखितस्य युग्म कुर्वन्तु –

| | | |
|---|---|---|
| २. कृषकः (रैयत) | - | ग्रामसमूहः । |
| ३. महाल(ग्रामसमूहः) | - | कृषकः (किसान) । |
| ४. निजः | - | कृषकभूमौ कृषिः (रैयतों की जमीन पर खेती) । |
| ५. कृषिकार्यम् (रैयती) | - | उद्यानस्वामिनां नैजभूमौ कृषिः । |

२. रिक्तस्थानानि पूरयत –

(क) यूरोपे "वोड" इत्यस्य उत्पादकाः --------- इत्यस्मात् स्वीयायस्य हानेः विभ्यति स्म ।

(ख) अष्टादशशताब्दस्य समाप्तौ ब्रिटेने "नील"-पदार्थम् अभिलक्ष्य अभ्यर्थना -------कारणात् वर्धितुम् आरब्धा ।

(ग) ....... अन्वेषणात् प्राक् नीलस्य अन्ताराष्ट्रियाभ्यर्थनायां कुप्रभावः जातः ।

(घ) चम्पारणान्दोलनं -------- विरुधम् आसीत् ।

**आगछन्तु, कल्पयामः**

कश्चित् कृषकः नीलोत्पादनाय बाध्यः क्रियते, उद्यानस्वामिकृषकयोर्मध्ये जातस्य वार्तालापस्य कल्पनां कुर्वन्तु। कृषकं प्रसीदयितुम् उद्यानस्वामी किं कारणं वक्ष्यति ? कृषकः कं तर्कम् उपस्थापयिष्यति ? एतयोः कृषकोद्यानस्वामिनोः पारस्परिक-संवादम् अभिनयद्वारा दर्शयन्तु।

## आच्छन्तु विचारयामः –

३. स्थायिभूप्रबन्धनस्य मुख्यपक्षाणां वर्णनं कुर्वन्तु।

४. "महालवारी"व्यवस्था स्थायिभूप्रबन्धस्य अपेक्षया कथं पृथक् आसीत् ?

५. राजस्वनिर्धारणस्य नूतनायाः "मुनरो"व्यवस्थायाः कारणात् उत्पन्नयोः द्वयोः समस्ययोः विषये ज्ञापयन्तु।

६. कृषकाः नील-कृषि-कार्यं किमर्थं न कर्तुम् इच्छन्ति स्म ?

७. कासु परिस्थितिषु बङ्गप्रान्ते नीलस्य उत्पादनं सर्वथा नष्टम् ?

## आगच्छन्तु कृत्वा पश्यामः –

८. चम्पारणान्दोलने महात्मगान्धिनः भूमिकायाः विषये इतोऽपि सूचनाः एकत्रीकुर्वन्तु।

९. भारतस्य आरम्भिकाणां चाय-कफघ्नी-उद्यानानाम् इतिहासं परिशीलयन्तु। जानन्तु यत् एतेषाम् उद्यानानां श्रमिकानां नीलोद्यानश्रमिकानां च मध्ये काः समानताः काः च विभिन्नताः आसन् ?

इति तृतीयोऽध्यायः